नवमः पाठः - ९

विवेकयुक्तः मीनः

अस् - धातुः, वर्तमानकालः

एकः जलाशयः अस्ति । अत्र त्रयः मीनाः सन्ति । ते सुखेन जीवन्ति । एकदा धीवराः तत्र आगच्छन्ति । ते वदन्ति - "अत्र अनेके मीनाः सन्ति । वयं श्वः आगत्य तान् नेष्यामः ।" अनन्तरं ततः गच्छन्ति ।

एकः मीनः वदति - "अहं भीतः अस्मि । युवां कथं भीतौ न स्थः ?" अन्यौ वदतः - "आवां धीरौ स्वः । अतः नास्ति चिन्ता ।"

प्रथमः वदति - "वयम् अन्यत्र गच्छाम ।"

द्वितीयः वदति - "त्वं वृथा भीतः असि । वयं बहुकालतः अत्र सुखेन स्मः । किमर्थम् अन्यत्र गच्छाम ?" इति ।

प्रथमः वदति - "अहं भीतः अस्मि । अहम् अन्यत्र गच्छामि" इति ।

तृतीयः वदति - "त्वम् एकः गच्छ । आवाम् अत्र एव स्वः ।"

प्रथमः मीनः अन्यं जलाशयम् अगच्छत् । अनन्तरदिने धीवराः तत्र आगच्छन्ति । जलाशयं पश्यन्ति । तत्र मीनौ स्तः । धीवराः तौ गृहीत्वा नयन्ति ।